শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে ষোডশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে ষোডশং দশকম্ ॥

## নরনারাযণাৱতারৱর্ণনং, দক্ষযাগৱর্ণনং চ

দক্ষো ৱিরিঞ্চতনযোঽথ মনোস্তনূজাং
লব্ধ্ৱা প্রসূতিমিহ ষোডশ চাপ কন্যাঃ।
ধর্মে ত্রযোদশ দদৌ পিতৃষু স্ৱধাং চ
স্ৱাহাং হৱির্ভুজি সতীং গিরিশে ৎৱদংশে॥ **16.1** ॥

মূর্তির্হি ধর্মগৃহিণী সুষুৱে ভৱন্তং
নারাযণং নরসখং মহিতানুভাৱম্।
যজ্জন্মনি প্রমুদিতাঃ কৃততূর্যঘোষাঃ
পুষ্পোৎকরান্ প্রৱৱৃষুর্নুনুৱুঃ সুরৌঘাঃ॥ **16.2** ॥

দৈত্যং সহস্রকৱচং কৱচৈঃ পরীতং
সাহস্রৱৎসরতপস্সমরাভিলৱ্যৈঃ।
পর্যাযনির্মিততপস্সমরৌ ভৱন্তৌ
শিষ্টৈককঙ্কটমমুং ন্যহতাং সলীলম্॥ **16.3** ॥

অন্ৱাচরন্নুপদিশন্নপি মোক্ষধর্মং
ৎৱং ভ্রাতৃমান্ বদরিকাশ্রমমধ্যৱাৎসীঃ।
শক্রোঽথ তে শমতপোবলনিস্সহাত্মা
দিৱ্যাঙ্গনাপরিৱৃতং প্রজিঘায মারম্॥ **16.4** ॥

কামো ৱসন্তমলযানিলবন্ধুশালী
কান্তাকটাক্ষৱিশিখৈর্ৱিকসদ্ৱিলাসৈঃ।

ৱিধ্যন্মুহুর্মুহুরকম্পমুদীক্ষ্য চ ৎৱাং
ভীরুস্ত্ৱযাঽথ জগদে মৃদুহাসভাজা॥ **16.5**॥

ভীত্যাঽলমঙ্গজ ৱসন্ত সুরাঙ্গনা ৱো
মন্মানসং ৎৱিহ জুষধ্ৱমিতি ব্রুৱাণঃ।
ৎৱং ৱিস্মযেন পরিতঃ স্তুৱতামথৈষাং
প্রাদর্শযঃ স্ৱপরিচারক কাতরাক্ষীঃ॥ **16.6**॥

সম্মোহনায মিলিতা মদনাদযস্তে
ৎৱদ্দাসিকাপরিমলৈঃ কিল মোহমাপুঃ।
দত্তাং ৎৱযা চ জগৃহুস্ত্রপযৈৱ সর্ৱ -
স্ৱর্ৱাসিগর্ৱশমনীং পুনরুর্ৱশীং তাম্॥ **16.7**॥

দৃষ্টেৱার্ৱশীং তৱ কথাং চ নিশম্য শক্রঃ
পর্যাকুলোঽজনি ভৱন্মহিমাৱমর্শাৎ।
এৱং প্রশান্তরমণীযতরাৱতারাৎ
ৎৱত্তোঽধিকো ৱরদ কৃষ্ণতনুস্ত্ৱমেৱ॥ **16.8**॥

দক্ষস্তু ধাতুরতিলালনযা রজোঽন্ধো
নাত্যাদৃতস্ত্ৱযি চ কষ্টমশান্তিরাসীৎ।
যেন ৱ্যরুন্ধ স ভৱত্তনুমেৱ শর্ৱং
যজ্ঞে চ ৱৈরপিশুনে স্ৱসুতাং ৱ্যমানীৎ॥ **16.9**॥

ক্রুদ্ধেশমর্দিতমখঃ স তু কৃত্তশীর্ষো
দেৱপ্রসাদিতহরাদথ লব্ধজীৱঃ।
ৎৱৎপূরিতক্রতুৱরঃ পুনরাপ শান্তিং
স ৎৱং প্রশান্তিকর পাহি মরুৎপুরেশ॥ **16.10**॥

॥ ইতি শ্রীমন্নারাযণীযে ষোডশং দশকং সমাপ্তম্॥